National Journal of
Hindi & Sanskrit Research

ISSN: 2454-9177
NJHSR 2024; 1(55): 239-242
© 2024 NJHSR
www.sanskritarticle.com

**डा. दयानन्दपाणिग्राही**
सहायकाचार्यः,
कलियाचकविक्रमकिशोर-
आदर्शसंस्कृतमहाविद्यालयः,
हेडिया, पूर्व मेदिनीपुरम्, पश्चिमबंगाः

**Correspondence:**
**डा. दयानन्दपाणिग्राही**
सहायकाचार्यः,
कलियाचकविक्रमकिशोर-
आदर्शसंस्कृतमहाविद्यालयः,
हेडिया, पूर्व मेदिनीपुरम्, पश्चिमबंगाः

# ईश्वरकृष्णाभिमता तत्त्वमीमांसा

**डा. दयानन्दपाणिग्राही**

**शोधसारः**
भारतीयदर्शनपरम्परायां सांख्यदर्शनं प्राचीनतमं तर्कप्रधानं च दर्शनम् अस्ति। अस्य दर्शनस्य व्यवस्थितरूपेण प्रतिपादनं ईश्वरकृष्णविरचितायां *सांख्यकारिकायाम्* दृश्यते। ईश्वरकृष्णेन प्रतिपादिता तत्त्वमीमांसा प्रकृतिपुरुषयोः द्वैतसिद्धान्ते आधृता वर्तते। तत्र प्रकृतिः त्रिगुणात्मिका, जडस्वरूपा, समस्तजगतः उपादानकारणं च स्वीकृता; पुरुषः पुनः चेतनस्वरूपः, साक्षी, निरवयवः, अकर्ता च कथितः। ईश्वरकृष्णस्य मते प्रकृतेः विकाररूपेण महत्, अहङ्कारः, तन्मात्राणि, इन्द्रियाणि, महाभूतानि चेति पञ्चविंशतितत्त्वानि प्रतिपादितानि। एतेषां तत्त्वानां क्रमिकविकासेन जगतः उत्पत्तिः व्याख्यायते। सांख्यदर्शने सत्कार्यवादः, परिणामवादः, त्रिगुणसिद्धान्तः, दुःखत्रयनिवृत्तिः च प्रमुखतया निरूपिताः। पुरुषस्य प्रकृतेः भेदज्ञानमेव मोक्षस्य साधनं स्वीकृतम्। अस्मिन् शोधे ईश्वरकृष्णाभिमताया तत्त्वमीमांसायाः स्वरूपं, तत्त्वानां वर्गीकरणं, प्रकृतिपुरुषविवेकः, मोक्षसाधनं च सम्यगवलोकितम्।

**कूटशब्दाः**
सांख्यदर्शनम्, तत्त्वमीमांसा, प्रकृतिः, पुरुषः, त्रिगुणाः, सत्कार्यवादः, परिणामवादः, महत्तत्त्वम्, अहङ्कारः, मोक्षः, दुःखत्रयम्, सांख्यकारिका।

**उद्देश्यम्**
1. सांख्यकारिका आधारितया ईश्वरकृष्णस्य तत्त्वमीमांसायाः स्वरूपं ज्ञातुम्।
2. प्रकृतिपुरुषयोः स्वरूपभेदं तात्त्विकदृष्ट्या विश्लेषयितुम्।
3. पञ्चविंशतितत्त्वानां विकासक्रमं निरूपयितुम्।
4. सांख्यदर्शने प्रतिपादितस्य सत्कार्यवादस्य तथा परिणामवादस्य विवेचनं कर्तुम्।
5. मोक्षसाधनरूपेण विवेकज्ञानस्य महत्त्वं प्रतिपादयितुम्

**प्रस्तावना**
वैदिक-अवैदिकभेदेन विभक्तं भारतीयदर्शनं पुरुषार्थप्रतिपादनपरं दुःखानामात्यन्तिकनिवृत्तये निरतिशयसुखप्राप्तये च प्रवर्तितमिति निर्विवादोऽयं विषयः। तत्रापि वैदिकतत्त्वाधारेण प्रथितेषु षड्विधेष्वास्तिकदर्शनेषु सर्वप्राचीनतमं दर्शनमित्यनेन प्रसिद्धं भवति सांख्यदर्शनम्। अस्य सांख्यदर्शनस्य प्रवर्तकः महर्षिः कपिलः। सांख्यशब्दस्य निष्पत्तिः सम् उपसर्गपूर्वकं ख्याधातोः सञ्जाता। अस्यार्थोऽस्ति सम्यग्विचाराणामुपस्थापकं शास्त्रम्। शास्त्रेऽस्मिन् संक्षेपतः तत्त्वचतुष्टयस्य अस्तित्वमभ्युपगतम्। तानि यथा- प्रकृतिः, प्रकृतिविकृत्युभयात्मकम्, केवलविकृतिः, अनुभयात्मकं चेति। प्रकृतिः मूलप्रकृतिः अथवा प्रधानमित्युच्यते। यतः सा एव सकलप्रपञ्चस्य मूलकारणभूता भवति। प्रकर्षेण करोति - कार्यमुत्पादयति इति प्रकृतिः इति तस्याः व्युत्पत्तिः। अथवा या स्वभिन्नतत्त्वान्तराणाम् उत्पत्तिं करोति सा प्रकृतिरिति।

सांख्यस्येयं मौलिकचिन्ताधारा अत्यन्तप्राचीनोपनिषत्सु प्राप्यते। श्वेताश्वेतरे, बृहदारण्यके कठोपनिषदि च बहुषु स्थलेषु सांख्यतत्त्वानां विषये विचारः प्राप्यते । सांख्यशब्दस्य सर्वप्रथमोल्लेखः साक्षात् श्वेताश्वेतरोपनिषदि प्राप्यते । तद्यथा -

**"नित्यो नित्यानां चेतनश्चेतनानामेको बहुनां यो विदधाति कामान् ।**

**तत्कारणं सांख्ययोगाधिगम्यम् ज्ञात्वा देवं मुच्यते सर्वपाशैः ।।"[१]**

सांख्यदर्शनप्रवर्त्तकस्य महर्षिकपिलस्यापि सर्वप्रथमोल्लेखः श्वेताश्वेतरोपनिषदि भवति। तद्यथा -

**"यो योनि योनिमधितिष्ठत्येको विश्वानि रूपाणि योनिश्च सर्वाः ।**

**ऋषिं प्रसूतं कपिलं यस्तमग्रे ज्ञानैर्बिभर्ति जायमानं च पश्येत् ।।[२]**

सांख्याः प्रकृतिकारणवादीनः । तेषां मतानुसारं प्रकृतिः जगदुत्पत्तेः प्रधानकारणम् । प्रकृतेः सकाशात् त्रयोविंशतितत्त्वानामुत्पत्तिः भवति। सा च प्रकृतिः त्रिगुणात्मिका । नित्यम् अनादि च । एकाऽपि उपाधिवशात् अनेकत्वं धारयति । सांख्यस्य सिद्धान्तोऽयम् उपनिषत्सु अपि प्राप्यते तद्यथा -

**अजामेकां लोहितशुक्लकृष्णां बह्वीः प्रजाः सृजमानां सरुपाः ।**
**अजो ह्येको जुषमाणोऽनुशेते जहात्येनां भुक्तभोगामजोऽन्यः ।।[३]**

लोहितशुक्लकृष्णमिति गुणत्रयाणां निररूपणं छान्दोग्योपनिषदि स्पष्टररूपेण भवति -

**"यदग्ने रोहितं रूपं तेजसस्तद्रूपं, यच्छुक्लं तदपां, यत्कृष्णं तदन्नस्य ।"[४]**

सांख्यदर्शनस्य प्रमुखसिद्धान्तस्य सत्कार्यवादस्य निरूपणं छान्दोग्योपनिषदि प्राप्यते । यथा -

"सदेव सोम्येदमग्र आसीदेकमेवाद्वितीयम् । तद्धैक आहुरसदेवेदमग्र आसीदेकमेवाद्वितीयम् इति।[५]

सांख्यदर्शने व्यक्ताव्यक्तज्ञविज्ञानात् अर्थात् आत्मनः स्वरूपदर्शनादेव जीवः सकलबन्धविनिर्मुक्तः भवति । विवेकख्यात्या जीवस्य सर्वसंचितकर्मणां विनाशो भवति । प्रारब्धकर्मणः अवशिष्टसंस्कारवशात् कुलालचक्रवत् शरीरं केवलं भ्रमति । सिद्धान्तोऽयम् उपनिषदि वर्ण्यते -

**भिद्यते हृदयग्रन्थिश्छिदयन्ते सर्वसंशयाः ।**
**क्षीयन्ते चास्य कर्माणि तस्मिन् दृष्टे परावरे ।।[६]**

अनेन प्रकारेण उपनिषत्सु अन्यदर्शनमिव सांख्यसिद्धान्तानामपि उपलब्धिः भवति । अतः सांख्यदर्शनं श्रुत्युपरि प्रतिष्ठितमिति सिद्धं भवति ।

**तत्त्वमीमांसा –**

सांख्यशास्त्रे मुख्यतः त्रीणि तत्त्वानि प्रतिपादितानि सन्ति - व्यक्ततत्त्वम्, अव्यक्ततत्त्वं, ज्ञतत्त्वञ्चेति। एषां त्रयाणां तात्विकविज्ञानेनैव दुःखानामात्यन्तिकी निवृत्तिर्भवति। व्यक्ततत्त्वानि त्रयोविंशतिर्वर्तन्ते। महत्, अहङ्कारः,मनः, पञ्चज्ञानेन्द्रियाणि, पञ्चकर्मेन्द्रियाणि, पञ्चतन्मात्राणि, पञ्चमहाभूतानि चेति। मूलप्रकृतिरव्यक्तमस्ति सा च जडात्मिका विद्यते।'ज्ञ' संज्ञपुरुषतत्त्वं व्यक्ताव्यक्तयोः परे तिष्ठति। एवं पञ्चविंशतितत्त्वानि सांख्यशास्त्रे प्रतिपादितानि। एषां सांख्योक्ततत्त्वानां वर्गीकरनेवं प्रकारेण कृतं-

**"मूलप्रकृतिरविकृतिर्महदाद्याः प्रकृतिविकृतयः सप्त ।**

**षोडशकस्तु विकारो न प्रकृतिर्न विकृतिः पुरुषः ।।" [७]**

मूलप्रकृतिरविकृतिः, महदाद्याः सप्त प्रकृतिविकृतयः सन्ति, षोडशतत्त्वानि न प्रकृतिर्वर्तन्ते न च विकृतिरेव सन्ति, पुरुषतत्त्वं न केनापि उत्पद्यते, न च किञ्चिद् उत्पादयति।

सांख्योक्तं पुरुषतत्त्वं चेतनमस्ति। तदतिरिक्तानि व्यक्ताव्यक्ततत्त्वानि जडात्मिकानि सन्ति। पुरुषः निष्क्रियो निर्गुणो निर्लिप्तश्च वर्तते। यद्यपि अन्यानि चतुर्विंशतितत्त्वानि त्रिगुणात्मिकानि सन्ति तथापि पुरुषापेक्षया तानि अप्रधानानि वर्तन्ते। त्रिविधं तत्त्वमेव जगतः सूक्ष्मपदार्थरूपं भवति। त्रीणि तत्त्वानि एव कार्यकारणरूपेण परिणतानि सन्ति ।

सांख्यसिद्धान्तानुसारम् अस्य दृश्यमानस्य जगतो मूले त्रयाणां गुणानाम् अवस्थितिरस्ति। अर्थात् सम्पूर्णं विश्वं सत्त्वरजस्तमसां परिणाममरूपमस्ति। एषां त्रयाणां गुणानां तारतम्येनैव वस्तुतः स्वरूपम् उत्पद्यते विनश्यति च। त्रिषु गुणेषु सत्त्वगुणः प्रकाशकोऽस्ति लघुश्च वर्तते, रजोगुणः चाञ्चल्ययुक्तः उत्तेजकश्च कथितः, तमोगुणः आवरणकः गुरुश्च विद्यते। एषां सांख्योक्तगुणानां विषये सांख्यकारिकायां उक्तं -

**"सत्त्वं लघु प्रकाशकमिष्टमुपष्टम्भकं चलं च रज: ।**

**गुरुवरणकमेव तम: प्रदीपवच्चार्थतो वृत्ति: ।।" [८]**

संसारे सर्वेषां पदार्थानां त्रिगुणात्मकतया परिणामित्वं स्वाभाविकमस्ति। सांख्ये परिणामरहितं केवलं पुरुषतत्त्वमस्ति। पदार्थानां परिणामः त्रिविधः प्रतिपादितः - धर्मपरिणामः, लक्षणपरिणामः, अवस्थापरिणामश्च।

धर्मपरिणामो यथा मृत्तिकया घटः, लक्षणपरिणामो यथा अतीतः वर्तमानः भविष्यत् वेति कालभेदः, अवस्थापरिणामो यथा बाल्य-यौवन-वार्धक्याद्या अवस्थाः।

सांख्योक्ता प्रकृतिः नित्या सततपरिणामिनी अस्ति। एवं सत्त्वरजस्तमसां त्रयाणां गुणानां साम्यावस्था प्रकृतिः कथ्यते। एषैव व्यक्तावस्थायां सृष्टिरस्ति। सृष्टिः कार्यरूपा विद्यते। मूलप्रकृतिश्च तस्या कारणमस्ति। तथापि सांख्ये सत्कार्यवादस्य सिद्धान्तोऽभिमतः। सत्कार्यवादस्य सिद्धान्तानुसारेण कार्यं सत् वर्तते कारणे तस्य सत्वं सिद्ध्यति। कर्मणः कदापि विनाशो नैव भवति अपि तु कारणरूप तस्य तिरोभावो भवति।

सत्कार्यवादः - सांख्यदर्शनस्य प्रमुखेषु सिद्धान्तेषु अन्यतमः सिद्धान्तः सत्कार्यवादो वर्तते। अस्य सिद्धान्तस्य मूलं छान्दोग्योपनिषदि प्राप्यते। यथा-

**"सदेव सोम्येदमग्र आसीदेकमेवाद्वितीयम् ।**

**तद्धैक आहुरसदेवेदमग्र आसीदेकमेवाद्वितीयं तस्मादसतः सज्जायत ।।"[९]**

सत्कार्यवादस्येयं मान्यता विद्यते यत् उत्पत्तेः पूर्वमपि कार्यं स्वकारणे तिष्ठति। उत्पत्तेः प्रागपि कार्यं सद्विद्यते। तत्र सांख्यकारिकायां कारिकामाध्यमेन पञ्चभिः हेतुभिः सत्कार्यवादस्य सिद्धिं सांख्याचार्याः एवं रूपेण कुर्वन्ति -

**"असदकरणादुपादानग्रहणात्सर्वसम्भवाभावात् ।।**

**शक्तस्य शक्यकरणात् कारणभावाच्च सत्कार्यम् ।।"[१०]**

(१) असदकरणात् - अर्थात् यत् सत् नास्ति तस्मिन् उत्पादनक्षमताया अभावो भवति, यथा शशशृङ्गम्।

(२) उपादानग्रहणात् - प्रत्येकं कार्यस्य कृते उपादानस्य ग्रहणं क्रियते यथा पटस्य कृते तन्तवः। कार्येण असम्बद्धं कारणं कदापि तत्कार्यम् उत्पादयितुं न शक्नोति।

(३) सर्वसम्भवाभावात् - केनापि कारणेन कस्यापि कार्यस्योत्पत्तिर्नैव भविंतु शक्नोति। अनेनेदं ज्ञायते यत् कार्यं कारणे कारणव्यापारात् पूर्वमपि विद्यमानं भवति।

(४) शक्तस्य शक्यकरणात् - कस्मिंश्चिदपि कारणे तत्सम्बन्धिनं कार्यम् उत्पादयितुं क्षमता भवति। तदैव तत्कार्यम् उत्पद्यते। अर्थात् तत् कार्यं तस्मिन् शक्ते कारणे नित्यं स्थितं भवति। व्यापारेण सह तद्व्यक्तं भवति।

(५) कारणाभावात् - कार्यं कारणे तादात्म्यसम्बन्धेन भवति, अतो यदि कारणमस्ति तर्हि तस्मिन् तादात्म्यसम्बन्धेन कार्यमपि विद्यमानं भवति । यतो हि यदि कारणं सत् अस्ति तर्हि तस्मिन् कार्यमपि सत् एव व्यक्तं भविष्यति । अन्यथा तु कार्यकारणयोः तादात्म्यसम्बन्धः असिद्धो भर्वेत्।

एभिः कारणैः सिद्ध्यति यत् इदम् अखिलं जगत् अव्यक्तावस्थायाम् अव्यक्तप्रकृतौ तादात्म्यसम्बन्धेन स्थितं भवति। गुणवैषम्येन च उत्पन्नपारिमाणरूपं कारणं व्यापारान्तरं व्यक्तं भवति। न च नूतनरूपेण उत्पद्यते यथा कच्छपस्य अङ्गानि शीतसमाधेरनन्तरं व्यक्तानि जायन्ते सः च क्रियाशीलो भवति, शीतकाले पुनः आत्मनः अवयवानि निरोद्धुं निष्क्रियोऽपि भवति। एवमेव सांख्यमतेन सृष्टिः परिणामरूपिणी कार्यव्यापारे जाते जगद्रूपेण व्यक्ता भवति, कारणव्यापारे अवरुद्धे सति च सा स्वकारणेष्वेव तिरोहिता जायते।

महत्तत्त्वम् - यद्यपि महत् तत्त्वमपि त्रिगुणात्मकमस्ति तथापि इदम् अध्यवसायात्मकम् अर्थात् निश्चयात्मकं भवति। इदं मूलप्रकृत्या उत्पद्यते अतः विकृतिरस्ति, किन्तु अनया अहंकारतत्त्वमपि उत्पद्यते, अतः प्रकृतिरप्यस्ति। महत्तत्त्वस्यैव अपरं नाम बुद्धिरस्ति। बुद्धिश्च द्विधा कथिता- सात्त्विकी, तामसिकी च । बुद्धेः सात्त्विकस्वरूपे धर्मो, ज्ञानं, विरागः, ऐश्वर्यश्चेति चत्वारि वैशिष्ट्यानि भवन्ति, बुद्धेः तामसिकस्वरूपे अधर्मः, अज्ञानं, रागः, अनैश्वर्यश्चेति चत्वारि तद्विरुद्धानि वैशिष्ट्यानि भवन्ति। अस्मिन् विषये सांख्यकारिकायां कारिकामाध्यमेन उक्तम् -

**"अध्यवसायो बुद्धिर्धर्मो ज्ञानं विराग ऐश्वर्यम् ।**

**सात्त्विकमेतद्रूपं तामसमस्माद्विपर्यस्तम् ।।"** ११

इदं बुद्धितत्त्वमेव भोगस्य साधनमस्ति। इदमेव च प्रकृति पुरुषयोर्भेदं प्रतिपादयति।

अहङ्कारतत्त्वम् -बुद्धित्वात् अहङ्कारस्य उत्पत्तिर्भवति। इदम् अभिमानस्वरूपम् 'अहम्' इत्यादिरूपेण भावात्मकं चास्ति। यद्यपि सत्त्वादयः त्रयो गुणाः परस्परं विरुद्धाः सन्ति, किन्तु त्रयाणां परस्परं सहयोगं विना किमपि कार्यं न सम्पद्यते। अतएव त्रयाणां मध्ये एकस्य अवस्थानं न भवति केवलं प्राधान्येनैव तन्नाम गृह्यते। अहङ्कारेऽपि त्रयो गुणा निहिताः सन्ति। अयम् अहङ्कारो बुद्ध्या उत्पन्नो भवति अतः विकृतिरस्ति, किन्तु अस्मात् अन्येषां तत्त्वानाम् उत्पत्तिरपि जायते, अतः प्रकृतिरप्यस्ति। तमोगुणप्रधानोऽहङ्कारः भूतादिसंज्ञको भवति। अस्मात् पञ्चतन्मात्रणि उत्पद्यन्ते। रजोगुणप्रधानोऽहङ्कारस्तैजसो भवति। अस्मिन् विषये सांख्यकारिकायां कारिकामाध्यमेन उक्तम् -

**"अभिमानोऽहंकारः तस्माद्विविधः प्रवर्तते सर्गः ।**

**एकादशकश्च गणस्तन्मात्रपञ्चकश्चैव ।।"** १२

**"सात्त्विक एकादशकः प्रवर्तते वैकृतादहंकारात् ।**

**भूतादेस्तन्मात्रः स तामसस्तैजसादुभयम् ।।"** १३

एकादशइन्द्रियाणि सांख्यदर्शने एकादश इन्द्रियाणि अभिमतानि सन्ति। एषु पञ्च कर्मेन्द्रियाणि, पञ्च ज्ञानेन्द्रियाणि,मनश्च गृह्यन्ते। इमानि वैकृत-अहङ्कारात् उत्पन्नानि सन्ति अतएव अहङ्कारस्य विकृतिरुच्यते। अस्मिन् विषये सांख्यकारिकायां कारिकामाध्यमेन उक्तम् -

**"सात्त्विक एकादशकः प्रवर्तते वैकृतादहङ्कारात् ।**

**भूतादेस्तन्मात्रः स तामसस्तैजसादुभयम् ।।"** १४

ज्ञानेन्द्रियाणि पञ्च सन्ति-श्रोत्रं, त्वक्, चक्षुः, रसना, घ्राणः चेति। एतान्येव बुद्धीन्द्रियाणि उच्यन्ते। कर्मेन्द्रियाणि अपि पञ्च वर्तन्ते-वाक्, पाणिः, पादौ, पायुः, उपस्थं चेति। तद्यथा –

**"बुद्धीन्द्रियाणि चक्षुःश्रोत्रघ्रणरसनत्वगाख्यानि ।**

**वाक्पाणिपादपायूपस्थानि कर्मेन्द्रियाण्याहुः ।।"** १५

ज्ञानेन्द्रियाणां विषयाः सन्ति- शब्दः, स्पर्शः, रूपं, रसः, गन्धश्चेति। तथा कर्मेन्द्रियाणां विषयाः सन्ति-वचनम्, आदानम्, विहरणम्, उत्सर्गः, आनन्दश्चेति। अस्मिन् विषये सांख्यकारिकायां कारिकामाध्यमेन उक्तम् -

**"शब्दादिषु पञ्चानामालोचनमात्रमिष्यते वृत्तिः ।**

**वचनादानविहरणोत्सर्गानन्दाश्च पञ्चानाम् ।।** १६ **इति ।**

| इन्द्रियाणि | श्रोत्रं | त्वक् | चक्षुः | रसना | घ्राणः | वाक् | पाणिः | पादः | पायुः | उपस्थं |
|---|---|---|---|---|---|---|---|---|---|---|
| विषयाः | शब्दः | स्पर्शः | रूपः | रसः | गन्धः | वचनं | आदानं | गमनं | उत्सर्गः | आनन्दः |

**बुद्धिन्द्रियाणि तेषां पञ्च विशेषाविशेषविषयाणि ।**
**वाग्भवति शब्दविषया शेषाणि तु पञ्चविषयाणि ।।** १७

मनः उभयात्मकं भवति। यतो हि मनो विना ज्ञानेन्द्रियाणि कर्मेन्द्रियाणि च नैव प्रवर्तन्ते। यदा मनः ज्ञानेन्द्रियैः सह ज्ञानस्य विषयान् गृह्वाति तदा ज्ञानेन्द्रियं भवति, यदा च कर्मेन्द्रियैः सह क्रियोत्पादनं करोति तदा कर्मेन्द्रियं भवति। इदं सङ्कल्पविकल्पात्मकं भवति अतो यथा बुद्धिः निश्चयात्मिका भवति तदिदं निश्चयात्मकं न भवति। अस्मिन् विषये सांख्यकारिकायामुच्यते-

**उभयात्मकमत्र मनः सङ्कल्पमिन्द्रियं च साधर्म्यात् ।**
**गुणपरिणामविशेषान्नानात्वं बाह्यभेदाश्च ।।** १८

पञ्चतन्मात्राणि - अहङ्कारस्य तामसरूपात् पञ्चतन्मात्राणि उद्भवन्ति। तन्मात्रशब्दस्य तात्पर्यमस्ति तदेव इति तन्मात्रम्। शब्दः, स्पर्शः, रूपं, रसो गन्धश्च तन्मात्राणि सन्ति। एतान्येव सूक्ष्मभूतान्यपि सन्ति। आभ्य एव स्थूलभूतानि व्यक्तानि भवन्ति, अतः प्रकृतिरूपाण्यपि सन्ति।

पञ्चमहाभूतानि - पञ्च तन्मात्रेभ्यः पृथक्-पृथक् क्रमशः शब्दात् आकाशः, स्पर्शाद् वायुः, रूपात् तेजः, रसात् जलम्, गन्धात् पृथ्वी चेति पञ्चमहाभूतानि व्यक्तानि भवन्ति। इमे स्थूलपदार्थाः पञ्चतन्मात्राणां

विकृतयः सन्ति। सांख्यशास्त्रे कथिता इमे सर्वेर् व्यक्तपदार्थाः अनित्याः सन्ति। एषु आश्रितत्त्वमपि विद्यत। एते लिङ्गरूपा अर्थात् हेतुभूता अपि सन्ति। इमे त्रिगुणात्मकाः प्रकृतिकार्यतया जडाश्चापि वर्तन्ते।

पुरुषतत्त्वम् - पुरुषतत्त्वं प्रत्यक्षानुमानादिभिः प्रमाणैः सिद्धं नैव भवितुं शक्नोति तस्य सिद्धिः केवलं शब्दप्रमाणेनैव भवति। पुरुषतत्त्वम् अहैतुकं नित्यं सर्वव्यापि निष्क्रियं गुणातीतं चास्ति। पुरुषः एकोऽस्ति अनेको वेति विषये सांख्यशास्त्रस्य टीकाकारेषु पर्याप्तं मतभेदो दृश्यते। अस्य कारणमिदमस्ति यत् एकस्मिन् आत्मनि स्वीकृते सति लोके सर्वेषां प्राणिनाम् एक एव व्यापारो भर्वेत् किन्तु जन्म-मरण-करणादिक्रियाणाम् एकस्मिन् काले एव अनेकताम् अवलोक्य इदमेव वक्तुं शक्यते यत् प्रतिशरीरम् आत्मा भिन्नोऽस्ति। सांख्यकारिकायामुच्यते -

**"जननमरणकरणानां प्रतिनियमादयुगपत्प्रवृत्तेश्च ।**

**पुरुषबहुत्वं सिद्धं त्रैगुण्यविपर्ययाच्चैव ।।"** १९

पुरुषतत्त्वस्य सिद्धौ सांख्यशास्त्रं प्रायेण अनुमानस्य आश्रयं गृह्णाति। तत्रोक्तं प्रत्येकं संघातः अन्यस्य कृते भवति यथा विष्ठरथादि। जीवन्मुक्तदशायां गुणत्रयस्य अभावात् इदं दृश्यमाणं जगत् आधेयमस्ति। अस्य कृतेऽधिष्ठानस्य आवश्यकता भवति। इदं व्यक्तं जगत् योग्यमस्ति। अस्मै भोक्तुरावश्यकतया कैवल्यार्थ क्रियामाणं प्रयत्नं च दृष्ट्वा कस्यचित् चैतन्यतत्त्वस्यैवानुमानं भवति। इदं चैतसन्यतत्त्वं प्रतिशरीरं पृथक् पृथक् वर्तते। अस्यैव पुरुषतत्त्वस्य बिम्बः महत् तत्रैव निपतति। तदा महत्तत्त्वं जडीभूतमपि चेतनवत् प्रतीयते। तदानीं तस्य बिम्बस्य प्रतिबिम्बः पुरुषे निपतति। तस्मात् पुरुषोऽपि बुद्धिधर्मभ्यो मुक्त इव प्रतीतिविषयो भवति। एषैव अविद्येति उच्यते। इदमेव बन्धस्य कारणमस्ति।

प्रमाणतत्त्वमीमांसा - सांख्यदर्शने प्रमेयतत्त्वानां ज्ञानाय प्रमाणानाम् अनिवार्यता स्वीक्रियते। सांख्यमतेन प्रमाणानि त्रीणि सन्ति-दृष्टम्, अनुमानम्, आप्तवचनञ्चेति। इतरशास्त्रेषु यानि अतिरिक्तानि प्रमाणान्युक्तानि तेषामेषु त्रिष्वेव अन्तर्भावोऽत्र कृतः। प्रत्यक्षम् सांख्यकारिकायां प्रत्यक्षस्य लक्षणमस्ति- प्रतिविषयाध्यवसायो दृष्टः। अर्थात् ज्ञानेन्द्रियाणां स्वस्वविषयैः सह यः संयोगोऽस्ति, तेनोत्पन्नं ज्ञानं प्रत्यक्षं भवति। अनुमानम् तल्लिङ्गिपूर्वकमनुमानम् इति अनुमानलक्षणम्। अर्थात् यत्र लिङ्गेन लिङ्गिनो ज्ञानं विधीयते तत्र तत्प्रमाणम् अनुमानमिति उच्यते। अस्य त्रयो भेदाः सन्ति-पूर्ववत्, शेषवत्, सामान्यतोदृष्टं चेति। कारणेन कार्यस्य अनुमानं पूर्ववत् भवति, कार्येण कारणस्य अनुमानं शेषवद् भवति। अतीन्द्रियादिविषयाणां ज्ञाने सामन्यतोदृष्टम् अनुमानं भवति। शब्दप्रमाणम् आप्तश्रुतिराप्तवचनतु इति शब्दप्रमाणस्य लक्षणम् अस्ति। सांख्यकारिकायामुच्यते -

**"दृष्टमनुमानमाप्तवचनं च सर्वप्रमाणसिद्धत्वात् ।**

**त्रिविधं प्रमाणमिष्टं प्रमेयसिद्धिः प्रमाणाद्धि ।।"** २०

**"प्रतिविषयाध्यवसायो दृष्टं त्रिविधमनुमानमाख्यातम् ।**

**तल्लिङ्गलिङ्गिपूर्वकमाप्तश्रुतिराप्तवचनं तु ।।"** २१

मोक्षविचारः - निस्सङ्गः पुरुषः अविद्या च नित्यतत्वे स्तः। एतदर्थमनयोः संयोगोऽपि अनादिरेव मन्यते। प्रकृतिरपि अनादि जम्डा एव अस्ति। पुरुषस्य प्रतिबिम्बेन प्रकृतिरथवा तदुत्पन्नं महत् तत्त्वम् आत्मानं चेतनवत् अवगच्छति। एवं महतः प्रतिबिम्बः पुरुषे निपतति, ततः प्रकृतिधर्मान् पुरुषः स्वगतानेव अवगच्छति अर्थात् ये सुखदुःखादयः प्रकृताः परिणामाः सन्ति। पुरुषः तान् जानाति। अनेन सः कर्त्तृभोक्त्रादिरूपण विज्ञायते। अयमेव पुरुषस्य अयथार्थरूपः बन्धोऽस्ति। पुरुषोऽस्मात् कल्पितबन्धनात् मुक्तो भूत्वा आत्मनः स्वरूपम् अभिज्ञातवान्। प्रकृतेः स्वरूपज्ञानमेव विर्वेकख्यातिरस्ति। उभयोः प्रकृतिपुरुषयोः आत्मनः स्वरूप - अवस्थितिरेव मुक्तिर्विद्यते।

एवं जगत्कर्त्तृत्वादयः सर्वे धर्माः प्रकृतेरेव सन्ति। पुरुषस्तु साक्षिमात्रमस्ति। तस्य द्रष्टृत्वम् अकर्त्तृत्वं भोक्तृत्वं चापि मन्यते। एतद्वीपरीतं सर्वेर धर्माः मूलप्रकृतौ सन्ति। अथायं प्रश्नो जायते यत् प्रकृतिरचेतनाऽस्ति तथापि कर्तव्यरूपो धर्मस्तस्यां कथं घटते। अस्मिन् विषये ईश्वरकृष्णो लिखति- पुरुषस्य साक्षित्वे कर्त्तृत्वादयो धर्माः मूलप्रकृतावपि स्वाभाविकाः सन्ति। यथा धेनोः स्तनेषु वत्सवृद्ध्यर्थम् अभिवृद्धये जडमपि दुग्धं स्वतः प्रवर्तते। एवं प्रकारेण प्रतिपुरुषं मुक्तये प्रकृतिः स्वभावतो महदादेः सृष्टिं करोति। अत्र तस्य स्वकीयं किमपि स्वार्थम् न विद्यते। सांख्यकारिकायामुच्यते

**"वत्सविवृद्धिनिमित्तं क्षीरस्य यथा प्रवृत्तिरज्ञस्य ।**

**पुरुषविमोक्षनिमित्तं तथा प्रवृत्तिः प्रधानस्य ।।"** २२

**"औत्सुक्यविनिवृत्यर्थं यथा क्रियासु प्रवर्तते लोकः ।**

**पुरुषस्य विमोक्षार्थं प्रवर्तते तद्वदव्यक्तम् ।।"** २३ **इति शम्।**

वस्तुतः यस्मात् प्रकृतेः उत्पन्नमिदं जगत् तस्यामेव प्रकृतौ लीनतां याति । अनेन कार्यकारणयोः एकरूपतां सूचिता भवति । प्रकृतिस्तु पुरुषसंयोगेन जगत्कारणतामधिगच्छति । एतदेव कथयति कारिकाकारः –

पुरुषस्य दर्शनार्थं कैवल्यार्थं तथा प्रधानस्य ।

**पङ्ग्वन्धवदुभयोरपि संयोगस्तत्कृतः सर्गः ॥**२४ **इति ॥**

प्रकृतितत्त्वस्य अङ्गीकारेण पञ्चविंशतितत्त्वानां विवेचनं पुरुषस्य जागतिकव्यवहारश्च सम्भवति । सृष्टिरपि सार्था भवति । एतदेव व्यावहारिक प्रयोजनं प्रकृतितत्त्वस्य । प्रकृतितत्त्वम् अनङ्गीकारेण न जातु पुरुषस्य परमपुरुषार्थप्राप्तिः । अतः पुरुषस्य मोक्षप्राप्तिरेव प्रकृतितत्त्वस्य पारमर्थिकं प्रयोजनं भवतीति शम्।

**पादटिप्पणी :-**

१.श्वेतश्वतरोपनिषद् - ६.१२
२. श्वेतश्वतरोपनिषद् - ५.२
३. श्वेतश्वतरोपनिषद् - ४.५.
४.छान्दोग्योपनिषद् - ६.४.१
५.छान्दोग्योपनिषद् - ६.२.१
६.मुण्डकोपनिषद् - २.२.९
७. सांख्यकारिका -३
८. सांख्यकारिका -१३
९. छान्दोग्योपनिषद्- ६/२/१
१०. सांख्यकारिका -९
११. सांख्यकारिका -२३
१२. सांख्यकारिका -२४
१३. सांख्यकारिका -२५
१४. सांख्यकारिका -२५
१५. सांख्यकारिका -२६
१६. सांख्यकारिका -२८
१७. सांख्यकारिका -३४
१८. सांख्यकारिका -२७
१९. सांख्यकारिका -१८
२०. सांख्यकारिका -४
२१. सांख्यकारिका -५
२२. सांख्यकारिका -५७
२३. सांख्यकारिका -५८
२४ सांख्यकारिका -२१

**सहायकग्रन्थः :-**

१. ईश्वरकृष्णः, सांख्यकारिका(गौडपादभाष्ययुता) "अभिनवराजलक्ष्मी" संस्कृत-हिन्दीव्याख्योपेता ,चौखम्बा सुरभारती प्रकाशनम्, २००९
२. ईशादिदशोपनिषद् ,गीताप्रेस्,गोरखपुरम्।
३. छान्दोग्योपनिशषद्, गीताप्रेस्,गोरखपुरम्।